# दशमहाविद्याः(चम्पकमालिका)

शारदरात्रीः सेवनदीक्षां - एवमुमे मे देहि सुभाग्यम् |

जीवितमेतत् पादयुगे ते - यातु मुदा मे वाञ्छितमेतत् || 1 ||

ते दशविद्या कीर्तनभाग्यं - लब्धमहो मे पुण्यफलं तत् |

पुत्रकमुत्सङ्गं तव मातः - उद्वह दीनं पालय नित्यम् || 2 ||

कालविधात्री कौलिनि काली - मूलसरोजान्मूर्धसरोजं |

प्राप्य मदीयं कुण्डलिरूपा - सा कुरुतान्मामात्मसरूपम् || 3 ||

एकजटे! त्वं मोक्षविधात्री - नीलसुवाणी नामक विद्या |

उग्रविपत्तीरुग्रविरूपा - तारय तारे! सेवनतुष्टा || 4 ||

सुन्दरि! मातः! पञ्चदशी त्वं - चित्तसरोजं स्वीकुरु वासम् |

निर्मलयानादूर्ध्वगता वै - शीर्षसरोजं तर्पय नित्यम् || 5 ||

त्वं भुवनेशी सृष्टिविधात्री - कारणरूपा पालनकर्त्री |

पालय पुत्रं पोषय भक्त्या - वाञ्छितमोतद्देहि परेशि! || 6 ||

भैरवमङ्कं कुण्डनिधानं - भूमिजपद्मे मामक देहे |

भैरवि! कृत्वा नित्यनिवासं - कुण्डलिरूपा पाहि! परेशि! || 7 ||

रेणुकनामा च्छिन्नविमस्ते ! पुत्रकमेनं त्वं कुरु धीरम् |

भेदय शीर्षं भिन्नकपालं - सिद्धिमुमे ! मे देहि विमोक्षम् || 8 ||

उत्कटरोषा धूमवती त्वं - विश्वविनाशं संकुरुषे चेत् |

धूमिति मन्त्रं ठाभ्यामाशीःपूर्वकमोक्षं दास्यति नूनम् || 9 ||

भञ्जय शत्रुं पालय मित्रं - मामक रक्षां त्वं कुरु नित्यम् |

नित्यनिवासं चित्तजपद्मे - मे बगले! त्वं स्वीकुरु मातः!|| 10 ||

तन्त्रसुगीतां मन्त्रनिधानां - शोभित वीनापल्लवपाणिम् |

शोणितवासालंकृतभासा - भासित मातङ्गीं प्रणमामि || 11 ||

हे! कमले! त्वं श्रीकरि भूयाः- वीक्षणभाग्यं देहि महान्तम् |

षोडशवर्णं श्रीमिति मातः - शीर्षसुपद्मे भासतु नित्यम् || 12 ||

## फलश्रुतिः

श्रीपादुकाविनिर्यातां स्तुतिं चम्पकमालिकाम् |

यः पठेत्परया भक्त्या - स सिद्धिमवाप्नुयात् ||

************